[1]क्रय:, [A]निष्क्रय:, [2]अवक्रय:, विक्रय:, क्राप:, [3]क्रीत्रिमम्, क्राप:, चिक्रीष:, चेक्रीय: ;

क्रेतुम्, क्रापयितुम्, चिक्रीषितुम्, चेक्रीयितुम् ;

विक्रीति:, क्रापणा, चिक्रीषा, चेक्रीया ;

परिक्रयणम्, क्रापणम्, चिक्रीषणम्, चेक्रीयणम् ;

क्रीत्वा, क्रापयित्वा, चिक्रीषित्वा, चेक्रीयित्वा ;

विक्रीय, विक्राप्य, विचिक्रीष्य, विचेक्रीय्य ;

क्रायम् २, } क्रापम् २, } चिक्रीषम् २, } चेक्रीयम् २ ; }
क्रीत्वा २, } क्रापयित्वा २, } चिक्रीषित्वा २, } चेक्रीयित्वा २; }

[4]क्रयिक:.

## (275) "क्रीडृ विहारे" (I-भ्वादि:-350. अक. सेट्. पर.)

क्रीडक:-डिका, क्रीडक:-डिका, चिक्रीडिषक:-षिका, चेक्रीडक: -डिका ;

क्रीडिता-त्री, क्रीडयिता-त्री, चिक्रीडिषिता-त्री, चेक्रीडिता-त्री ;

क्रीडन्-न्ती, [5]अनुक्रीडन्, सङ्क्रीडन्-न्ती, क्रीडयन्-न्ती, चिक्रीडिषन्-न्ती; —

क्रीडिष्यन्-न्ती-ती, क्रीडयिष्यन्-न्ती-ती, चिक्रीडिषन्-न्ती-ती ;

[6]अनुक्रीडमान:[B]-सङ्क्रीडमान:-परिक्रीडमान:, [7]आक्रीडमान:,

---

1. 'एरच्' (3-3-56) इति भावे अच्।
2. 'आयस्थानेषु वणिगादिभिर्दीयमान: स्वामिग्राह्यो भाग:=**अवक्रय:**। यस्य '**पिण्डक**' इति प्रसिद्धि: ।' इति **माधवधातुवृत्तौ**। 'पुंसि संज्ञायां घ: प्रायेण' (3-3-118) इति घ: ।
3. 'ड्वित: क्त्रि:' (3-3-88) इति भावे क्त्रि: । '**क्त्रेर्मम्नित्यम्**' (4-4-20) इति तेन निर्वृत्तम्—(4-4-19) इत्यर्थे मप् । मप्प्रत्ययान्त एव प्रयोज्य: । [**क्रयिक:**।
4. औणादिके [द. उ. 3-16] इकन् प्रत्यये **क्रयिक:** इति रूपम्। पण्यसङ्ग्रहीता=
5. 'तृतीयार्थे' (1-4-85) इति यदाऽनु: कर्मप्रवचनीयसंज्ञक:, तदा शता ।
6. '**क्रीडोऽनुसंपरिभ्यश्च**' (1-3-21) इति शानच् । 'समोऽकूजने इति वक्तव्यम्' (वा 1-3-21) इत्युक्तत्वात् '**सङ्क्रीडन्ति** शकटानि' इत्यपि भवति। शत्रन्तमेतत्।
7. 'क्रीडोऽनुसंपरिभ्यश्च' (1-3-21) इत्यत्र चकारादाङ अनुवृत्ते: शानच् ।

A. 'स्वामिनो **निष्क्रयं** गन्तुमाविष्कृतबल: कपि: ।
रराज समरे शत्रून् घ्नन् दुष्कृतबहिष्कृत: ॥' भ. का. 9-61.

B. 'फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु ।
साध्वनु**क्रीडमानानि** पश्य बृन्दानि पक्षिणाम् ॥' भ. का. 8-10.